# GuruvAyurappa or NarAyaniya or Rogaharasahasranamastotram

# ગુરુવાયુરપ્પ અથવા નારાયણીય તથા રોગહરસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : guruvAyurappansahasranAmastotram

File name : guruvAyurappansahasranAmastotram.itx

Category : vishhnu, krishna, sahasranAma

Location : doc_vishhnu

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : See corresopnding Namavali

Latest update : February 9, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 9, 2023

*sanskritdocuments.org*

GuruvAyurappa or NarAyaniya or Rogaharasahasranamastotram

# ગુરુવાયુરપ્પ અથવા નારાયણીય તથા રોગહરસહસ્રનામસ્તોત્રમ્

અથ ધ્યાનમ્ ।

સૂર્યસ્પર્ધિકિરીટમૂર્ધ્વતિલકપ્રોદ્ભાસિફાલાન્તરં
    કારુણ્યાકુલનેત્રમાર્દ્રહસિતોલ્લાસં સુનાસાપુટમ્ ।
ગણ્ડોદ્યન્મકરાભકુણ્ડલયુગં કણ્ઠોજ્જ્વલત્કૌસ્તુભં
    ત્વદ્રૂપં વનમાલ્યહારપટલશ્રીવત્સદીપ્રં ભજે ॥

કેયૂરાઙ્ગદકઙ્કણોત્તમમહારત્નાઙ્ગુલીયાઙ્કિત-
    શ્રીમદ્બાહુચતુષ્કસઙ્ગતગદાશઙ્ખારિપઙ્કેરુહામ્ ।
કાઞ્ચિત્કાઞ્ચનકાઞ્ચિલાઞ્છિતલસત્પીતામ્બરાલમ્બિની-
    માલમ્બે વિમલામ્બુજદ્યુતિપદાં મૂર્તિં તવાર્તિચ્છિદમ્ ॥

યત્ત્રૈલોક્યમહીયસોઽપિ મહિતં સમ્મોહનં મોહનાત્
    કાન્તં કાન્તિનિધાનતોઽપિ મધુરં માધુર્યધુર્યાદપિ ।
સૌન્દર્યોત્તરતોઽપિ સુન્દરતરં ત્વદ્રૂપમાશ્ચર્યતો-
    ઽપ્યાશ્ચર્યં ભુવને ન કસ્ય કુતુકં પુષ્ણાતિ વિષ્ણો વિભો ॥

અથ સ્તોત્રમ્ ।

ૐ ગુરુવાયુપુરાધીશો સાન્દ્રાનન્દાવબોધદઃ ।
રુજાસાકલ્યસંહર્તા દુરિતાટવિદાહકઃ ॥ ૧॥

વાયુરૂપો વાગતીતઃ સર્વબાધાપ્રશામકઃ ।
યુગન્ધરો યુગાતીતો યોગમાયાસમન્વિતઃ ॥ ૨॥

પુરુજિત્પુરુષવ્યાઘ્રઃ પુરાણપુરુષઃ પ્રભુઃ ।
રાધાકાન્તો રમાકાન્તઃ રતીરમણજન્મદઃ ॥ ૩॥

ધીરોઽધીશો ધનાધ્યક્ષો ધરણીપતિરચ્યુતઃ ।
શરણ્યઃ શર્મદઃ શાન્તઃ સર્વશાન્તિકરઃ સ્મૃતઃ ॥ ૪॥

મતિમાન્માધવો માયી માનાતીતો મહાદ્યુતિઃ ।

મતિમોહપરિચ્છેત્તા ક્ષયવૃદ્ધિવિવર્જિતઃ ॥ ૫॥

રોગપાવકદગ્ધાનામમૃતસ્યન્દદાયકઃ ।
ગતિસ્સમસ્તલોકાનાં ગણનાતીતવૈભવઃ ॥ ૬॥

મરુદ્ગણસમારાધ્યો મારુતાગારવાસકઃ ।
પાલકસ્સર્વલોકાનાં પૂરકસ્સર્વકર્મણામ્ ॥ ૭॥

કુરુવિન્દમણીબદ્ધદિવ્યમાલાવિભૂષિતઃ ।
રુક્મહારાવલીલોલવક્ષઃશોભાવિરાજિતઃ ॥ ૮॥

સૂર્યકોટિપ્રભાભાસ્વદ્બાલગોપાલવિગ્રહઃ ।
રત્નમાયૂરપિઞ્છોદ્યત્સૌવર્ણમુકુટાઞ્ચિતઃ ॥ ૯॥

કાલામ્બુદરુચિસ્પર્ધિકેશભારમનોહરઃ ।
માલેયતિલકોલ્લાસિભાલબાલેન્દુશોભિતઃ ॥ ૧૦॥

આર્તદીનકથાલાપદત્તશ્રોત્રદ્વયાન્વિતઃ ।
ભ્રૂલતાચલનોદ્ભૂતનિર્ધૂતભુવનાવલિઃ ॥ ૧૧॥

ભક્તતાપપ્રશમનપીયૂષસ્યન્દિલોચનઃ ।
કારુણ્યસ્નિગ્ધનેત્રાન્તઃ કાઙ્ક્ષિતાર્થપ્રદાયકઃ ॥ ૧૨॥

અનોપમિતસૌભાગ્યનાસાભઙ્ગિવિરાજિતઃ ।
મકરમત્સ્યસમાકારરત્નકુણ્ડલભૂષિતઃ ॥ ૧૩॥

ઇન્દ્રનીલશિલાદર્શગણ્ડમણ્ડલમણ્ડિતઃ ।
દન્તપઙ્ક્તિદ્વયોદ્દીપ્તદરસ્મેરમુખામ્બુજઃ ॥ ૧૪॥

મન્દસ્મિતપ્રભામુગ્ધસર્વદેવગણાવૃતઃ ।
પક્વબિમ્બફલાધર ઓષ્ઠકાન્તિવિલાસિતઃ ॥ ૧૫॥

સૌન્દર્યસારસર્વસ્વચિબુકશ્રીવિરાજિતઃ ।
કૌસ્તુભાભાલસત્કણ્ઠઃ વન્યમાલાવલીવૃતઃ ॥ ૧૬॥

મહાલક્ષ્મીસમાવિષ્ટશ્રીવત્સાઙ્કિતવક્ષસઃ ।
રત્નાભરણશોભાઢ્યો રામણીયકશેવધિઃ ॥ ૧૭॥

વલયાઙ્ગદકેયૂરકમનીયભુજાન્વિતઃ ।
વેણુનાલીલસદ્ધસ્તઃ પ્રવાલાઙ્ગુલિશોભિતઃ ॥ ૧૮॥

ચન્દનાગરુકાશ્મીરકસ્તૂરીકલભાઞ્ચિતઃ ।
અનેકકોટિબ્રહ્માણ્ડસઙ્ગૃહીતમહોદરઃ ॥ ૧૯॥

કૃશોદરઃ પીતચેલાપરિવીતકટીતટઃ ।
બ્રહ્માવાસમહાપદ્માવાલનાભિપ્રશોભિતઃ ॥ ૨૦॥

પદ્મનાભો રમાકાન્તઃ ફુલ્લપદ્મનિભાનનઃ ।
રશનાદામસન્નદ્ધહેમવસ્ત્રપરિચ્છદઃ ॥ ૨૧॥

ગોપસ્ત્રીહૃદયોન્માથિકોમલોરુદ્વયાન્વિતઃ ।
નીલાશ્મપેટકાકારજાનુદ્વન્દ્વમનોહરઃ ॥ ૨૨॥

કામતૂણીરસઙ્કાશચારુજઙ્ઘાવિશોભિતઃ ।
નમજ્જનસમસ્તાર્તિહારિપાદદ્વયાન્વિતઃ ॥ ૨૩॥

વૈદ્યનાથપ્રણમિતઃ વેદવેદાઙ્ગકારકઃ ।
સર્વતાપપ્રશમનઃ સર્વરોગનિવારકઃ ॥ ૨૪॥

સર્વપાપપ્રમોચકઃ દુરિતાર્ણવતારકઃ ।
બ્રહ્મરૂપઃ સૃષ્ટિકર્તા વિષ્ણુરૂપઃ પરિત્રાતા ॥ ૨૫॥

શિવરૂપઃ સર્વભક્ષઃ ક્રિયાહીનઃ પરમ્બ્રહ્મઃ ।
વિકુણ્ઠલોકસંવાસી વૈકુણ્ઠો વરદો વરઃ ॥ ૨૬॥

સત્યવ્રતતપઃપ્રીતઃ શિશુમીનસ્વરૂપવાન્ ।
મહામત્સ્યત્વમાપન્નો બહુધાવર્ધિતઃ સ્વભૂઃ ॥ ૨૭॥

વેદશાસ્ત્રપરિત્રાતા હયગ્રીવાસુહારકઃ ।
ક્ષીરાબ્ધિમથનાધ્યક્ષઃ મન્દરચ્યુતિરોધકઃ ॥ ૨૮॥

ધૃતમહાકૂર્મવપુઃ મહાપતગરૂપધૃક્ ।
ક્ષીરાબ્ધિમથનોદ્ભૂતરત્નદ્વયપરિગ્રહઃ ॥ ૨૯॥

ધન્વન્તરીરૂપધારી સર્વરોગચિકિત્સકઃ ।
સમ્મોહિતદૈત્યસઙ્ઘઃ મોહિનીરૂપધારકઃ ॥ ૩૦॥

કામેશ્વરમનસ્થૈર્યનાશકઃ કામજન્મદઃ ।
યજ્ઞવારાહરૂપાઢ્યઃ સમુદ્ધૃતમહીતલઃ ॥ ૩૧॥

હિરણ્યાક્ષપ્રાણહારી દેવતાપસતોષકઃ ।
હિરણ્યકશિપુક્રૌર્યભીતલોકાભિરક્ષકઃ ॥ ૩૨॥

નારસિંહવપુઃ સ્થૂલસટાઘટ્ટિતખેચરઃ ।
મેઘારાવપ્રતિદ્વન્દ્વિઘોરગર્જનઘોષકઃ ॥ ૩૩॥

વજ્રક્રૂરનખોદ્ધાતદૈત્યગાત્રપ્રભેદકઃ ।
અસુરાસૃગ્વસામાંસલિપ્તભીષણરૂપવાન્ ॥ ૩૪॥

સન્ત્રસ્તદેવર્ષિસઙ્ઘઃ ભયભીતજગત્ત્રયઃ ।
પ્રહ્લાદસ્તુતિસન્તુષ્ટઃ શાન્તઃ શાન્તિકરઃ શિવઃ ॥ ૩૫॥

દેવહૂતીસુતઃ પ્રાજ્ઞઃ સાઙ્ખ્યયોગપ્રવાચકઃ ।
મહર્ષિઃ કપિલાચાર્યઃ ધર્માચાર્યકુલોદ્વહઃ ॥ ૩૬॥

વેનદેહસમુદ્ભૂતઃ પૃથુઃ પૃથુલવિક્રમઃ ।
ગોરૂપિણીમહીદોગ્ધા સમ્પદ્દુગ્ધસમાર્જિતઃ ॥ ૩૭॥

આદિતેયઃ કાશ્યપશ્ચ વટુરૂપધરઃ પટુઃ ।
મહાબલિબલધ્વંસી વામનો યાચકો વિભુઃ ॥ ૩૮॥

દ્વિપાદમાતત્રૈલોક્યઃ ત્રિવિક્રમસ્ત્રયીમયઃ ।
જામદગ્ન્યો મહાવીરઃ શિવશિષ્યઃ પ્રતાપવાન્ ॥ ૩૯॥

કાર્તવીર્યશિરચ્છેત્તા સર્વક્ષત્રિયનાશકઃ ।
સમન્તપઞ્ચકસ્રષ્ટા પિતૃપ્રીતિવિધાયકઃ ॥ ૪૦॥

સર્વસઙ્ગપરિત્યાગી વરુણાલ્લબ્ધકેરલઃ ।
કૌસલ્યાતનયો રામઃ રઘુવંશસમુદ્ભવઃ ॥ ૪૧॥

અજપૌત્રો દાશરથિઃ શત્રુઘ્નભરતાગ્રજઃ ।
લક્ષ્મણપ્રિયભ્રાતા ચ સર્વલોકહિતે રતઃ ॥ ૪૨॥

વસિષ્ઠશિષ્યઃ સર્વજ્ઞઃ વિશ્વામિત્રસહાયકઃ ।
તાટકામોક્ષકારી ચ અહલ્યાશાપમોચકઃ ॥ ૪૩॥

સુબાહુપ્રાણહન્તા ચ મારીચમદનાશનઃ ।
મિથિલાપુરિસમ્પ્રાપ્તઃ શૈવચાપવિભઞ્જકઃ ॥ ૪૪॥

સન્તુષિતસર્વલોકો જનકપ્રીતિવર્ધકઃ ।
ગૃહીતજાનકીહસ્તઃ સમ્પ્રીતસ્વજનૈર્યુતઃ ॥ ૪૫॥

પરશુધરગર્વહન્તા ક્ષત્રધર્મપ્રવર્ધકઃ ।

સન્ત્યક્તયૌવરાજ્યશ્ચ વનવાસે નિયોજિતઃ ॥ ૪૬॥

સીતાલક્ષ્મણસંયુક્તઃ ચીરવાસા જટાધરઃ ।
ગુહદ્રોણીમુપાશ્રિત્ય ગઙ્ગાપારમવાપ્તવાન્ ॥ ૪૭॥

સંસારસાગરોત્તારપાદસ્મરણપાવનઃ ।
રોગપીડાપ્રશમનઃ દૌર્ભાગ્યધ્વાન્તભાસ્કરઃ ॥ ૪૮॥

કાનનાવાસસન્તુષ્ટઃ વન્યભોજનતોષિતઃ ।
દુષ્ટરાક્ષસસંહર્તા મુનિમણ્ડલપૂજિતઃ ॥ ૪૯॥

કામરૂપાશૂર્પણખાનાસાકર્ણવિકૃન્તકઃ ।
ખરમુખાસુરમુખ્યાનામસઙ્ખ્યબલનાશકઃ ॥ ૫૦॥

માયામૃગસમાકૃષ્ટઃ માયામાનુષમૂર્તિમાન્ ।
સીતાવિરહસન્તપ્તઃ દારાન્વેષણવ્યાપૃતઃ ॥ ૫૧॥

જટાયુમોક્ષદાતા ચ કબન્ધગતિદાયકઃ ।
હનૂમત્સુગ્રીવસખા બાલિજીવવિનાશકઃ ॥ ૫૨॥

લીલાનિર્મિતસેતુશ્ચ વિભીષણનમસ્કૃતઃ ।
દશાસ્યજીવસંહર્તા ભૂમિભારવિનાશકઃ ॥ ૫૩॥

ધર્મજ્ઞો ધર્મનિરતો ધર્માધર્મવિવેચકઃ ।
ધર્મમૂર્તિસ્સત્યસન્ધઃ પિતૃસત્યપરાયણઃ ॥ ૫૪॥

મર્યાદાપુરુષો રામઃ રમણીયગુણામ્બુધિઃ ।
રોહિણીતનયો રામઃ બલરામો બલોદ્ધતઃ ॥ ૫૫॥

કૃષ્ણજ્યેષ્ઠો ગદાહસ્તઃ હલી ચ મુસલાયુધઃ ।
સદામદો મહાવીરઃ રુક્મિસૂતનિકૃન્તનઃ ॥ ૫૬॥

કાલિન્દીદર્પશમનઃ કાલકાલસમઃ સુધીઃ । var કાલીયદર્પશમનઃ
આદિશેષો મહાકાયઃ સર્વલોકધુરન્ધરઃ ॥ ૫૭॥

શુદ્ધસ્ફટિકસઙ્કાશો નીલવાસો નિરામયઃ ।
વાસુદેવો જગન્નાથઃ દેવકીસૂનુરચ્યુતઃ ॥ ૫૮॥

ધર્મસંસ્થાપકો વિષ્ણુરધર્મિગણનાશકઃ ।
કાત્યાયનીસહજની નન્દગોપગૃહે ભૃતઃ ॥ ૫૯॥

કંસપ્રેરિતપૈશાચબાધાસઙ્ઘવિનાશકઃ ।
ગોપાલો ગોવત્સપાલઃ બાલક્રીડાવિલાસિતઃ ॥ ૬૦॥

ક્ષીરચોરો દધિચોરઃ ગોપીહૃદયચોરકઃ ।
ઘનશ્યામો માયૂરપિઞ્છાભૂષિતશીર્ષકઃ ॥ ૬૧॥

ગોધૂલીમલિનાકારો ગોલોકપતિઃ શાશ્વતઃ ।
ગર્ગર્ષિકૃતસંસ્કારઃ કૃષ્ણનામપ્રકીર્તિતઃ ॥ ૬૨॥

આનન્દરૂપઃ શ્રીકૃષ્ણઃ પાપનાશકરઃ કૃષ્ણઃ ।
શ્યામવર્ણતનુઃ કૃષ્ણઃ શત્રુસંહારકઃ કૃષ્ણઃ ॥ ૬૩॥

લોકસઙ્કર્ષકઃ કૃષ્ણઃ સુખસન્દાયકઃ કૃષ્ણઃ ।
બાલલીલાપ્રમુદિતઃ ગોપસ્ત્રીભાગ્યરૂપકઃ ॥ ૬૪॥

દધિજપ્રિયઃ સર્પ્યશ્રી(?) દુગ્ધભક્ષણતત્પરઃ ।
વૃન્દાવનવિહારી ચ કાલિન્દીક્રીડનોત્સુકઃ ॥ ૬૫॥

ગવલમુરલીવેત્રઃ પશુવત્સાનુપાલકઃ ।
અઘાસુરપ્રાણહારી બ્રહ્મગર્વવિનાશકઃ ॥ ૬૬॥

કાલિયમદમર્દકઃ પરિપીતદવાનલઃ ।
દુરિતવનદાહકઃ પ્રલમ્બાસુરનાશકઃ ॥ ૬૭॥

કામિનીજનમોહનઃ કામતાપવિનાશકઃ ।
ઇન્દ્રયાગનિરોધકઃ ગોવર્ધનાદ્રિપૂજકઃ ॥ ૬૮॥

ઇન્દ્રદર્પવિપાટકઃ ગોવર્ધનો ગિરિધરઃ ।
સુરભિદુગ્ધાભિષિક્તો ગોવિન્દેતિ પ્રકીર્તિતઃ ॥ ૬૯॥

વરુણાર્ચિતપાદાબ્જઃ સંસારામ્બુધિતારકઃ ।
રાસલીલાવિલાસિતઃ શૃઙ્ગારૈકરસાલયઃ ॥ ૭૦॥

મુરલીગાનમાધુર્યમત્તગોપીજનાવૃતઃ ।
રાધામાનસતોષકઃ સર્વલોકસન્તોષકઃ ॥ ૭૧॥

ગોપિકાગર્વશમનઃ વિરહક્લેશનાશકઃ ।
સુદર્શનચક્રધરઃ શાપમુક્તસુદર્શનઃ ॥ ૭૨॥

શઙ્ખચૂડકૃતાન્તશ્ચ અરિષ્ટાસુરમર્દકઃ ।
શૂરવંશકુલોદ્ભૂતઃ કેશવઃ કેશિસૂદનઃ ॥ ૭૩॥

વ્યોમાસુરનિહન્તા ચ વ્યોમચારપ્રણમિતઃ ।
દુષ્ટકંસવધોદ્યુક્તઃ મથુરાપુરિમાપ્તવાન્ ॥ ૭૪॥

બલરામસહવર્તી યાગચાપવિપાટકઃ ।
કુવલયાપીડમર્દકઃ પિષ્ટચાણૂરમુષ્ટિકઃ ॥ ૭૫॥

કંસપ્રાણસમાહર્તા યદુવંશવિમોચકઃ ।
જરાસન્ધપરાભૂતઃ યવનેશ્વરદાહકઃ ॥ ૭૬॥

દ્વારકાપુરનિર્માતા મુચુકુન્દગતિપ્રદઃ ।
રુક્મિણીહારકો રુક્મિવીર્યહન્તાઽપરાજિતઃ ॥। ૭૭॥

પરિગૃહીતસ્યમન્તકઃ ધૃતજામ્બવતીકરઃ ।
સત્યભામાપતિશ્ચૈવ શતધન્વાનિહન્તકઃ ॥ ૭૮॥

કુન્તીપુત્રગુણગ્રાહી અર્જુનપ્રીતિકારકઃ ।
નરકારિર્મુરારિશ્ચ બાણહસ્તનિકૃન્તકઃ ॥ ૭૯॥

અપહૃતપારિજાતઃ દેવેન્દ્રમદભઞ્જકઃ ।
નૃગમોક્ષદઃ પૌણ્ડ્રકવાસુદેવગતિપ્રદઃ ॥ ૮૦॥

કાશિરાજશિરચ્છેત્તા ભસ્મીકૃતસુદક્ષિણઃ ।
જરાસન્ધમૃત્યુકારી શિશુપાલગતિપ્રદઃ ॥ ૮૧॥

સાલ્વપ્રાણાપહારી ચ દન્તવક્ત્રાભિઘાતકઃ ।
યુધિષ્ઠિરોપદેષ્ટા ચ ભીમસેનપ્રિયઙ્કરઃ ॥ ૮૨॥

અર્જુનાભિન્નમૂર્તિશ્ચ માદ્રીપુત્રગુરુસ્તથા ।
દ્રૌપદીરક્ષકશ્ચૈવ કુન્તીવાત્સલ્યભાજનઃ ॥ ૮૩॥

કૌરવક્રૌર્યસન્દષ્ટપાઞ્ચાલીશોકનાશકઃ ।
કૌન્તેયદૂતસ્તેજસ્વી વિશ્વરૂપપ્રદર્શકઃ ॥ ૮૪॥

નિરાયુધો નિરાતઙ્કો જિષ્ણુસૂતો જનાર્દનઃ ।
ગીતોપદેષ્ટા લોકેશઃ દુઃખમૌઢ્યનિવારકઃ ॥ ૮૫॥

ભીષ્મદ્રોણદ્રૌણિકર્ણાદ્યગ્નિજ્વાલાપ્રશામકઃ ।
કુચેલપત્નીદારિદ્ર્યદુઃખબાધાવિમોચકઃ ॥ ૮૬॥

અજઃ કાલવિધાતા ચ આર્તિઘ્નઃ સર્વકામદઃ ।

અનલો અવ્યયો વ્યાસઃ અરુણાનુજવાહનઃ ॥ ૮૭॥

અખિલઃ પ્રાણદઃ પ્રાણઃ અનિલાત્મજસેવિતઃ ।
આદિભૂત અનાદ્યન્તઃ ક્ષાન્તિક્લાન્તિવિવર્જિતઃ ॥ ૮૮॥

આદિતેયો વિકુણ્ઠાત્મા વૈકુણ્ઠો વિષ્ટરશ્રવાઃ ।
ઇજ્યઃ સુદર્શનો ઈડ્યઃ ઇન્દ્રિયાણામગોચરઃ ॥ ૮૯॥

ઉત્તમઃ સત્તમો ઉગ્ર ઉદાનઃ પ્રાણરૂપકઃ ।
વ્યાનાપાનો સમાનશ્ચ જીવમૃત્યુવિભાજકઃ ॥ ૯૦॥

ઊર્ધ્વગો ઊહિતો ઊહ્યઃ ઊહાતીતપ્રભાવવાન્ ।
ઋતમ્ભરો ઋતુધરઃ સપ્તર્ષિગણસેવિતઃ ॥ ૯૧॥

ઋષિગમ્યો ઋભુર્ઋદ્ધિઃ સનકાદિમુનિસ્તુતઃ ।
એકનાથો એકમૂર્તિરીતિબાધાવિનાશકઃ ॥ ૯૨॥

ઐન્ધનો એષણીયશ્ચ અનુલ્લઙ્ઘિતશાસનઃ ।
ઓજસ્કરો ઓષધીશો ઓડ્રમાલાવિભૂષિતઃ ॥ ૯૩॥

ઔષધઃ સર્વતાપાનાં સમાનાધિક્યવર્જિતઃ ।
કાલભૃત્કાલદોષઘ્નઃ કાર્યજ્ઞઃ કર્મકારકઃ ॥ ૯૪॥

ખડ્ગી ખણ્ડકઃ ખદ્યોતઃ ખલી ખાણ્ડવદાહકઃ ।
ગદાગ્રજો ગદાપાણી ગમ્ભીરો ગર્વનાશકઃ ॥ ૯૫॥

ઘનવર્ણો ઘર્મભાનુઃ ઘટજન્મનમસ્કૃતઃ ।
ચિન્તાતીતઃ ચિદાનન્દઃ વિશ્વભ્રમણકારકઃ ॥ ૯૬॥

છન્દકઃ છન્દનઃ છન્નઃ છાયાકારકઃ દીપ્તિમાન્ ।
જયો જયન્તો વિજયો જ્ઞાપકઃ જ્ઞાનવિગ્રહઃ ॥ ૯૭॥

ઝર્ઝરાપન્નિવારકઃ ઝણજ્ઝણિતનૂપુરઃ ।
ટઙ્કુટીકપ્રણમિતઃ ઠક્કુરો દમ્ભનાશકઃ ॥ ૯૮॥

તત્ત્વાતીતસ્તત્ત્વમૂર્તિઃ તત્ત્વચિન્તાપ્રચોદકઃ ।
દક્ષો દાતા દયામૂર્તિઃ દાશાર્હો દીર્ઘલોચનઃ ॥ ૯૯॥

પરાજિષ્ણુઃ પરન્ધામઃ પરાનન્દસુખપ્રદઃ ।
ભાલનેત્રઃ ફણિશાયી પુણ્યાપુણ્યફલપ્રદઃ ॥ ૧૦૦॥

બન્ધહીનો લોકબન્ધુઃ બાલકૃષ્ણઃ સતાઙ્ગતિઃ ।
ભવ્યરાશિર્ભિષગ્વર્યઃ ભાસુરઃ ભૂમિપાલકઃ ॥ ૧૦૧॥

મધુવૈરિઃ કૈટભારિર્મન્ત્રજ્ઞો મન્ત્રદર્શકઃ ।
યતિવર્યો યજમાનઃ યક્ષકર્દમભૂષિતઃ ॥ ૧૦૨॥

રઙ્ગનાથો રઘુવરઃ રસજ્ઞો રિપુકર્શનઃ ।
લક્ષ્યો લક્ષ્યજ્ઞો લક્ષ્મીકઃ લક્ષ્મીભૂમિનિષેવિતઃ ॥ ૧૦૩॥

વર્ષિષ્ઠો વર્ધમાનશ્ચ કરુણામૃતવર્ષકઃ ।
વિશ્વો વૃદ્ધો વૃત્તિહીનઃ વિશ્વજિદ્વિશ્વપાવનઃ ॥ ૧૦૪॥

શાસ્તા શંસિતઃ શંસ્તવ્યઃ વેદશાસ્ત્રવિભાવિતઃ ।
ષડભિજ્ઞઃ ષડાધારપદ્મકેન્દ્રનિવાસકઃ ॥ ૧૦૫॥

સગુણો નિર્ગુણઃ સાક્ષી સર્વજિત્સાક્ષિવર્જિતઃ ।
સૌમ્યઃ ક્રૂરઃ શાન્તમૂર્તિઃ ક્ષુબ્ધઃ ક્ષોભવિનાશકઃ ॥ ૧૦૬॥

હર્ષકઃ હવ્યભુક્ હવ્યઃ હિતાહિતવિભાવકઃ ।
વ્યોમ વ્યાપનશીલશ્ચ સર્વવ્યાપિર્મહેશ્વરઃ ॥ ૧૦૭॥

નારાયણો નારશાયી નરાયણો નરસખઃ ।
નન્દકી ચક્રપાણિશ્ચ પાઞ્ચજન્યપ્રઘોષકઃ ॥ ૧૦૮॥

કુમોદકઃ પદ્મહસ્તઃ વિશ્વરૂપો વિધિસ્તુતઃ ।
આદિશેષોઽપ્રમેયશ્ચ અનન્તઃ જ્ઞાનવિગ્રહઃ ॥ ૧૦૯॥

ભક્તિગમ્યઃ પરન્ધામઃ પરમો ભક્તવત્સલઃ ।
પરઞ્જ્યોતિઃ પરબ્રહ્મ પરમેષ્ઠિઃ પરાત્પરઃ ॥ ૧૧૦॥

વિશ્વાધારો નિરાધારઃ સદાચારપ્રચારકઃ ।
મહાયોગી મહાવીરો મહારૂપો મહાબલઃ ॥ ૧૧૧॥

મહાભોગી હવિર્ભોક્તા મહાયાગફલપ્રદઃ ।
મહાસત્ત્વો મહાશક્તિઃ મહાયોદ્ધા મહાપ્રભુઃ ॥ ૧૧૨॥

મહામોહો મહાકોપઃ મહાપાતકનાશકઃ ।
શાન્તઃ શાન્તિપ્રદઃ શૂરઃ શરણાગતપાલકઃ ॥ ૧૧૩॥

પદ્મપાદઃ પદ્મગર્ભઃ પદ્મપત્રનિભેક્ષણઃ ।
લોકેશઃ શર્વઃ કામેશઃ કામકોટિસમપ્રભઃ ॥ ૧૧૪॥

મહાતેજા મહાબ્રહ્મા મહાજ્ઞાનો મહાતપાઃ ।
નીલમેઘનિભઃ શ્યામઃ શુભાઙ્ગઃ શુભકારકઃ ॥ ૧૧૫ ॥

કમનઃ કમલાકાન્તઃ કામિતાર્થપ્રદાયકઃ ।
યોગિગમ્યો યોગરૂપો યોગી યોગેશ્વરેશ્વરઃ ॥ ૧૧૬ ॥

ભવો ભયકરો ભાનુઃ ભાસ્કરો ભવનાશકઃ ।
કિરિટી કુણ્ડલી ચક્રી ચતુર્બાહુસમન્વિતઃ ॥ ૧૧૭ ॥

જગત્પ્રભુર્દેવદેવઃ પવિત્રઃ પુરુષોત્તમઃ ।
અણિમાદ્યષ્ટસિદ્ધીશઃ સિદ્ધઃ સિદ્ધગણેશ્વરઃ ॥ ૧૧૮ ॥

દેવો દેવગણાધ્યક્ષો વાસવો વસુરક્ષકઃ ।
ઓઙ્કારઃ પ્રણવઃ પ્રાણઃ પ્રધાનઃ પ્રક્રમઃ ક્રતુઃ ॥ ૧૧૯ ॥

નન્દિર્નન્દિતો નાભ્યો નન્દગોપતપઃફલઃ ।
મોહનો મોહહન્તા ચ મૈત્રેયો મેઘવાહનઃ ॥ ૧૨૦ ॥

ભદ્રો ભદ્રઙ્કરો ભાનુઃ પુણ્યશ્રવણકીર્તનઃ ।
ગદાધરો ગદધ્વંસી ગમ્ભીરો ગાનલોલુપઃ ॥ ૧૨૧ ॥

તેજસસ્તેજસાં રાશિઃ ત્રિદશસ્ત્રિદશાર્ચિતઃ ।
વાસુદેવો વસુભદ્રો વદાન્યો વલ્ગુદર્શનઃ ॥ ૧૨૨ ॥

દેવકીનન્દનઃ સ્રગ્વી સીમાતીતવિભૂતિમાન્ ।
વાસવો વાસરાધીશઃ ગુરુવાયુપુરેશ્વરઃ ॥ ૧૨૩ ॥

યમો યશસ્વી યુક્તશ્ચ યોગનિદ્રાપરાયણઃ ।
સૂર્યઃ સુરાર્યમાર્કશ્ચ સર્વસન્તાપનાશકઃ ॥ ૧૨૪ ॥

શાન્તતેજો મહારૌદ્રઃ સૌમ્યરૂપોઽભયઙ્કરઃ ।
ભાસ્વાન્ વિવસ્વાન્ સપ્તાશ્વઃ અન્ધકારવિપાટકઃ ॥ ૧૨૫ ॥

તપનઃ સવિતા હંસઃ ચિન્તામણિરહર્પતિઃ ।
અરુણો મિહિરો મિત્રઃ નીહારક્લેદનાશકઃ ॥ ૧૨૬ ॥

આદિત્યો હરિદશ્વશ્ચ મોહલોભવિનાશકઃ ।
કાન્તઃ કાન્તિમતાં કાન્તિઃ છાયાનાથો દિવાકરઃ ॥ ૧૨૭ ॥

સ્થાવરજઙ્ગમગુરુઃ ખદ્યોતો લોકબાન્ધવઃ ।

કર્મસાક્ષી જગચ્ચક્ષુઃ કાલરૂપઃ કૃપાનિધિઃ ॥ ૧૨૮॥

સત્ત્વમૂર્તિસ્તત્ત્વમયઃ સત્યરૂપો દિવસ્પતિઃ ।
શુભ્રાંશુશ્ચન્દ્રમા ચન્દ્રઃ ઓષધીશો નિશાપતિઃ ॥ ૧૨૯॥

મૃગાઙ્કો માઃ ક્ષપાનાથઃ નક્ષત્રેશઃ કલાનિધિઃ ।
અઙ્ગારકો લોહિતાંશુઃ કુજો ભૌમો મહીસુતઃ ॥ ૧૩૦॥

રૌહિણેયો બુધઃ સૌમ્યઃ સર્વવિદ્યાવિધાયકઃ ।
વાચસ્પતિર્ગુરુર્જીવઃ સુરાચાર્યો બૃહસ્પતિઃ ॥ ૧૩૧॥

ઉશના ભાર્ગવઃ કાવ્યઃ કવિઃ શુક્રોઽસુરગુરુઃ ।
સૂર્યપુત્રો શનિર્મન્દઃ સર્વભક્ષઃ શનૈશ્ચરઃ ॥ ૧૩૨॥

વિધુન્તુદઃ તમો રાહુઃ શિખી કેતુર્વિરામદઃ ।
નવગ્રહસ્વરૂપશ્ચ ગ્રહકોપનિવારકઃ ॥ ૧૩૩॥

દશાનાથઃ પ્રીતિકરઃ માપકો મઙ્ગલપ્રદઃ ।
દ્વિહસ્તશ્ચ મહાબાહુઃ કોટિકોટિભુજૈર્યુતઃ ॥ ૧૩૪॥

એકમુખો બહુમુખઃ બહુસાહ્રસનેત્રવાન્ ।
બન્ધકારી બન્ધહીનઃ સંસારી બન્ધમોચકઃ ॥ ૧૩૫॥

મમતારૂપોઽહમ્બુદ્ધિઃ કૃતજ્ઞઃ કામમોહિતઃ ।
નાનામૂર્તિધરઃ શક્તિઃ ભિન્નદેવસ્વરૂપધૃક્ ॥ ૧૩૬॥

સર્વભૂતહરઃ સ્થાણુઃ શર્વો ભીમઃ સદાશિવઃ ।
પશુપતિઃ પાશહીનઃ જટી ચર્મી પિનાકવાન્ ॥ ૧૩૭॥

વિનાયકો લમ્બોદરઃ હેરમ્બો વિઘ્નનાશકઃ ।
એકદન્તો મહાકાયઃ સિદ્ધિબુદ્ધિપ્રદાયકઃ ॥ ૧૩૮॥

ગુહઃ સ્કન્દો મહાસેનઃ વિશાખઃ શિખિવાહનઃ ।
ષડાનનો બાહુલેયઃ કુમારઃ ક્રૌઞ્ચભઞ્જકઃ ॥ ૧૩૯॥

આખણ્ડલો સહસ્રાક્ષઃ વલારાતિશ્શચીપતિઃ ।
સુત્રામા ગોત્રભિદ્વજી ઋભુક્ષા વૃત્રહા વૃષા ॥ ૧૪૦॥

બ્રહ્મા પ્રજાપતિર્ધાતા પદ્મયોનિઃ પિતામહઃ ।
સૃષ્ટિકર્તા સુરજ્યેષ્ઠઃ વિધાતા વિશ્વસૃટ્ વિધિઃ ॥ ૧૪૧॥

પ્રદ્યુમ્નો મદનો કામઃ પુષ્પબાણો મનોભવઃ ।
લક્ષ્મીપુત્રો મીનકેતુરનઙ્ગઃ પઞ્ચશરઃ સ્મરઃ ॥ ૧૪૨ ॥

કૃષ્ણપુત્રો શર્વજેતા ઇક્ષુચાપો રતિપ્રિયઃ ।
શમ્બરઘ્નો વિશ્વજિષ્ણુર્વિશ્વભ્રમણકારકઃ ॥ ૧૪૩ ॥

બર્હિઃ શુષ્મા વાયુસખઃ આશ્રયાશો વિભાવસુઃ ।
જ્વાલામાલી કૃષ્ણવર્ત્મા હુતભુક્ દહનઃ શુચી ॥ ૧૪૪ ॥

અનિલઃ પવનો વાયુઃ પૃષદશ્વઃ પ્રભઞ્જનઃ ।
વાતઃ પ્રાણો જગત્પ્રાણઃ ગન્ધવાહઃ સદાગતિઃ ॥ ૧૪૫ ॥

પાશાયુધો નદીકાન્તઃ વરુણો યાદસામ્પતિઃ ।
રાજરાજો યક્ષરાજઃ પૌલસ્ત્યો નરવાહનઃ ॥ ૧૪૬ ॥

નિધીશઃ ત્ર્યમ્બકસખઃ એકપિઙ્ગો ધનેશ્વરઃ ।
દેવેશો જગદાધારઃ આદિદેવઃ પરાત્પરઃ ॥ ૧૪૭ ॥

મહાત્મા પરમાત્મા ચ પરમાનન્દદાયકઃ ।
ધરાપતિઃ સ્વર્પતિશ્ચ વિદ્યાનાથો જગત્પિતા ॥ ૧૪૮ ॥

પદ્મહસ્તઃ પદ્મમાલી પદ્મશોભિપદદ્વયઃ ।
મધુવૈરિઃ કૈટભારિઃ વેદધૃક્ વેદપાલકઃ ॥ ૧૪૯ ॥

ચણ્ડમુણ્ડશિરચ્છેત્તા મહિષાસુરમર્દકઃ ।
મહાકાલીરૂપધરઃ ચામુણ્ડીરૂપધારકઃ ॥ ૧૫૦ ॥

નિશુમ્ભશુમ્ભસંહર્તા રક્તબીજાસુહારકઃ ।
ભણ્ડાસુરનિષૂદકો લલિતાવેષધારકઃ ॥ ૧૫૧ ॥

ઋષભો નાભિપુત્રશ્ચ ઇન્દ્રદૌષ્ટ્યપ્રશામકઃ ।
અવ્યક્તો વ્યક્તરૂપશ્ચ નાશહીનો વિનાશકૃત્ ॥ ૧૫૨ ॥

કર્માધ્યક્ષો ગુણાધ્યક્ષઃ ભૂતગ્રામવિસર્જકઃ ।
ક્રતુર્યજ્ઞઃ હુતો મન્ત્રઃ પિતા માતા પિતામહઃ ॥ ૧૫૩ ॥

વેદ્યો વેદો ગતિર્ભર્તા સાક્ષી કારક વેદવિદ્ ।
ભોક્તા ભોજ્યઃ ભુક્તિકર્મ ભોજ્યાભોજ્યવિવેચકઃ ॥ ૧૫૪ ॥

સદાચારો દુરાચારઃ શુભાશુભફલપ્રદઃ ।
નિત્યોઽનિત્યઃ સ્થિરશ્ચલઃ દૃશ્યાદૃશ્યઃ શ્રુતાશ્રુતઃ ॥ ૧૫૫ ॥

આદિમધ્યાન્તહીનશ્ચ દેહી દેહો ગુણાશ્રયઃ ।
જ્ઞાનઃ જ્ઞેયઃ પરિજ્ઞાતા ધ્યાનઃ ધ્યાતા પરિધ્યેયઃ ॥ ૧૫૬॥

અવિભક્તો વિભક્તશ્ચ પૃથગ્રૂપો ગુણાશ્રિતઃ ।
પ્રવૃત્તિશ્ચ નિવૃત્તિશ્ચ પ્રકૃતિર્વિકૃતિરૂપધૃક્ ॥ ૧૫૭॥

બન્ધનો બન્ધકર્તા ચ સર્વબન્ધવિપાટકઃ ।
પૂજિતઃ પૂજકશ્ચૈવ પૂજાકર્મવિધાયકઃ ॥ ૧૫૮॥

વૈકુણ્ઠવાસઃ સ્વર્વાસઃ વિકુણ્ઠહૃદયાલયઃ ।
બ્રહ્મબીજો વિશ્વબિન્દુર્જડજીવવિભાજકઃ ॥। ૧૫૯॥

પિણ્ડાણ્ડસ્થઃ પરન્ધામઃ શબ્દબ્રહ્મસ્વરૂપકઃ ।
આધારષટ્કનિલયઃ જીવવ્યાપૃતિચોદકઃ ॥ ૧૬૦॥

અનન્તરૂપો જીવાત્મા તિગ્મતેજાઃ સ્વયમ્ભવઃ ।
અનાદ્યન્તઃ કાલરૂપઃ ગુરુવાયુપુરેશ્વરઃ ॥ ૧૬૧॥

ગૂરુર્ગુરુતમો ગમ્યો ગન્ધર્વગણવન્દિતઃ ।
રુક્મિણીવલ્લભઃ શૌરિર્બલરામસહોદરઃ ॥ ૧૬૨॥

પરમઃ પરમોદારઃ પન્નગાશનવાહનઃ ।
વનમાલી વર્ધમાનઃ વલ્લવીવલ્લભો વશી ॥ ૧૬૩॥

નન્દસૂનુર્નિત્યતૃપ્તઃ નષ્ટલાભવિવર્જિતઃ ।
પુરન્દરઃ પુષ્કરાક્ષઃ યોગિહૃત્કમલાલયઃ ॥ ૧૬૪॥

રેણુકાતનયો રામઃ કાર્તવીર્યકુલાન્તકઃ ।
શરણ્યઃ શરણઃ શાન્તઃ શાશ્વતઃ સ્વસ્તિદાયકઃ ॥ ૧૬૫॥

રોગઘ્નઃ સર્વપાપઘ્નઃ કર્મદોષભયાપહઃ ।
ગભસ્તિમાલી ગર્વઘ્નો ગર્ગશિષ્યો ગવપ્રિયઃ ॥ ૧૬૬॥

તાપસો તાપશમનઃ તાણ્ડવપ્રિયનન્દિતઃ ।
પઙ્ક્તિસ્યનપુત્રશ્ચ કૌસલ્યાનન્દવર્ધનઃ ॥ ૧૬૭॥

પ્રથિતઃ પ્રગ્રહઃ પ્રાજ્ઞઃ પ્રતિબન્ધનિવારકઃ ।
શત્રુઞ્જયો શત્રુહીનઃ શરભઙ્ગગતિપ્રદઃ ॥ ૧૬૮॥

મઙ્ગલો મઙ્ગલાકાન્તઃ સર્વમઙ્ગલમઙ્ગલઃ ।

યજ્ઞમૂર્તિર્વિશ્વમૂર્તિરાયુરારોગ્યસૌખ્યદઃ ॥ ૧૬૯॥

યોગીન્દ્રાણાં ત્વદઙ્ગેષ્વધિકસુમધુરં મુક્તિભાજાં નિવાસો
ભક્તાનાં કામવર્ષદ્યુતરુકિસલયં નાથ તે પાદમૂલમ્ ।
નિત્યં ચિત્તસ્થિતં મે પવનપુરપતે ! કૃષ્ણ ! કારુણ્યસિન્ધો !
હૃત્વા નિશ્શેષપાપાન્ પ્રદિશતુ પરમાનન્દસન્દોહલક્ષ્મીમ્ ॥

ઇતિ ગુરુવાયુરપ્પન્ સહસ્રનામસ્તોત્રં સમાપ્તમ્ ।

Encoded and proofread by PSA Easwaran

*GuruvAyurappa or NarAyaniya or Rogaharasahasranamastotram*
pdf was typeset on February 9, 2023

Please send corrections to *sanskrit@cheerful.com*